# संस्कृतवार्ता:

दिनाङ्क :-30.09.2025 प्रात: - 06:55

अथ वार्ताः

भूटान-रेलमार्ग:

भारत-भूटानदेशाभ्यां कोकराझार-गेलेफू , बनारहाट-समत्से इत्येतयोः मध्ये द्वौ सीमान्तरे-रेलसम्पर्कौ स्थापयितुं सहमति: अभिव्यक्ता। केन्द्रीयरेलमन्त्री अश्विनिवैष्णवः अवदत् यत् एषः नवतिः किलोमीटरमितं रेलमार्गः त्रयत्रिंशदधिकचतुरशतकोटिरूप्यकव्यये निर्मीयते। विदेशसचिवः विक्रम-मिसरी उक्तवान् यत् एषा भारत-भूटानयोः प्रथमः रेलसम्पर्कपरियोजना भविष्यति। रेलमार्गः भारत-भूटानयोः सम्बन्धः असाधारणविश्वास-परस्परसम्मान- सांस्कृतिकनात्यादिषु प्रतिष्ठितः अस्ति।

बीजेपी-एनडीए-डेलिगेशन

भारतीय-जनता-पार्टीति-दलस्य अध्यक्षः जगतप्रकाशनड्डाः अवदत् यत् तमिलनाडुराज्यस्य करूरमध्ये अभिनेतुः विजयथलपति इत्यस्य जनसभायाम् उत्कण्ठित-जन-भीति-संचारकारणात् जातायां घटनायां नैकेषां जनानां मृत्युः जातः, तत्र कथङ्कृत्वा इयं घटना प्रवृत्ता तस्य कारणान्वेषणार्थं किञ्चित् दलीय-प्रतिनिधिमण्डलं तत्र प्रेषितम् अस्ति। भाजपेतिदलीय-प्रतिनिधिमण्डलं प्रभावितपरिवारैः सह मेलयिष्यति, तथा च अध्यक्षाय समाख्यामपि प्रतिवेदयिष्यति, भाजपेति दलस्य सांसदपदासीना हेमामालिनी एतस्य प्रतिनिधिमण्डलस्य संयोजिकारूपेण कार्यनिर्वहणं करिष्यति, अन्येषु च प्रतिनिधिषु सांसदः अनुरागठाकुरः, तेजस्वीसूर्याः, अपराजितासारंगी, रेखाशर्मा, बृजलालः, शिवसेनासांसदः च श्रीकान्तशिंदेवर्यः टीडीपीसांसदः पुट्टामहेशकुमारः चापि सम्मिलितो भविष्यति, नड्डावर्येण मृतकानां जनानां कृते संवेदना अभिव्यक्ता, व्रणितानाञ्च शीघ्रस्वास्थ्यार्थं कामनापि कृता।

जयशङ्करः/विदेशमंत्री

विदेश-मंत्री डा. एस्. जयशङ्करः न्यूयार्क-नगरे कनाडादेशस्य विदेशमन्त्रिणा अनिता आनन्देन सह मिलितवान्, यत् द्वयोः देशयोः मध्ये सम्बन्धस्य पुनर्निर्माणे महत्त्वपूर्णं पदाक्षेपः वर्तते। जयशङ्करः सद्यः उच्चायुक्तानां नियुक्तेः निर्णयस्य स्वागतं कृतवान्।

कनाडा-बिश्नोई दलम्

कनाडा-देशे अपराध-संहितायाः अन्तर्गतं बिश्नोई-दलम् आतंकी संघटनत्वेन सूचीबद्धम् । दलस्य आतङ्किसु सूचीकरणस्य अर्थः अस्ति यत् कनाडा-देशे दलस्य स्वामित्वे यत् किमपि अस्ति, यस्मिन् सम्पत्तयः, वाहनानि, धनानि च सन्ति, तानि सर्वाणि ग्रहीतुं शक्यते। कनाडादेशस्य जनसुरक्षामन्त्री गैरी आनन्द-साङ्गरी अवदत् यत्, बिश्नोई दलेन आतङ्कस्य, हिंसायाः, भयस्य च कृते विशिष्टाः समुदायाः लक्षिताः सन्ति इति।

गोयलः- एफटीएएस

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पीयूषगोयलः अवदत् यत् यूरोपीय-मुक्त-वाणिज्य-सङ्घीय-देशैः तद्धि आइसलैण्ड-लिक्टेन्स्टीन-नार्वे-स्विट्जरलैण्ड इत्याख्यैः सह मुक्त-वाणिज्यीय-सन्धिः अक्तूबर-मासस्य प्रथमदिनाङ्कात् प्रभावी भविष्यति। गोयलः ह्यः उक्तवान् यत् विकसितदेशाः भारतेन सह वाणिज्यिक-सन्धौ हस्तारक्षार्थम् इच्छुकाः सन्ति। उपर्युक्तानि तथ्यानि मन्त्रिणा ह्यः ग्रेटर-नाएडा-मध्ये उत्तर-प्रदेश-अन्ताराष्ट्रिय-वाणिज्य-सम्मेलनस्य समापनावसरे प्रकटितानि।

आईसीसी/विश्व-चषक

क्रिकेटक्रीडायाम् अद्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य महिलानां आईसीसी विश्वचषक स्पर्धायाः आरम्भः गुवाहाटी-नगरस्य बरसापारा-क्रिकेट्-क्रीडाङ्गणे भारत-श्रीलङ्का-देशयोः मध्ये भविष्यति। अद्य अपराहणे त्रिवादने क्रीडा आरभ्यते। भारतीय-महिला-क्रिकेट्-दलं स्वस्य प्रथमं आई. सी. सी. उपाधिं प्राप्तुं सप्तचत्वारिंशत् वर्षाणां प्रतीक्षां समापयितुं प्रयासं करिष्यति। पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य महिला-विश्वचषकस्य पञ्चाशत्-क्षेपचक्रीय-क्रीडायाः क्रिकेट्-प्रतियोगितायाः त्रयोदश तमं संस्करणम् अस्ति, यस्मिन् अष्टदलानि सम्मिलितानि सन्ति-आस्ट्रेलिया, इङ्ग्लेण्ड्, भारतं, न्यूजीलैण्ड्, दक्षिण-आफ्रिका, श्रीलङ्का, बाङ्ग्लादेशः, पाकिस्तानः च।

।।इति वार्ताः।।